श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनत्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनत्रिंशं दशकम् ॥

## देवानाममृतोपलब्धिप्रकारवर्णनम्

उद्गच्छतस्तव करादमृतं हरत्सु
    दैत्येषु तानशरणाननुनीय देवान्।
सद्यस्तिरोदधिथ देव भवत्प्रभावा -
    दुद्यत्स्वयूथ्यकलहा दितिजा बभूवुः ॥ 29.1 ॥

श्यामां रुचाऽपि वयसाऽपि तनुं तदानीं
    प्राप्तोऽसि तुङ्गकुचमण्डलभङ्गुरां त्वम्।
पीयूषकुम्भकलहं परिमुच्य सर्वे
    तृष्णाकुलाः प्रतिययुस्त्वदुरोजकुम्भे ॥ 29.2 ॥

का त्वं मृगाक्षि विभजस्व सुधामिमामि -
    त्यारूढरागविवशानभियाचतोऽमून्।
विश्वस्यते मयि कथं कुलटाऽस्मि दैत्या
    इत्यालपन्नपि सुविश्वसितानतानीः ॥ 29.3 ॥

मोदात् सुधाकलशमेषु ददत्सु सा त्वं
    दुश्चेष्टितं मम सहध्वमिति ब्रुवाणा।
पङ्क्तिप्रभेदविनिवेशितदेवदैत्या
    लीलाविलासगतिभिः समदाः सुधां ताम् ॥ 29.4 ॥

अस्मास्वियं प्रणयिनीत्यसुरेषु तेषु
    जोषं स्थितेष्वथ समाप्य सुधां सुरेषु।

त्वं भक्तलोकवशगो निजरूपमेत्य
स्वर्भानुमर्धपरिपीतसुधं व्यलावीः ॥ **29.5** ॥

त्वत्तः सुधाहरणयोग्यफलं परेषु
दत्वा गते त्वयि सुरैः खलु ते व्यगृह्णन्।
घोरेऽथ मूर्छति रणे बलिदैत्यमाया -
व्यामोहिते सुरगणे त्वमिहाविरासीः ॥ **29.6** ॥

त्वं कालनेमिमथ मालिमुखाञ्जघन्थ
शक्रो जघान बलिजम्भवलान् सपाकान्।
शुष्कार्द्रदुष्करवधे नमुचौ च लूने
फेनेन नारदगिरा न्यरुणो रणं त्वम् ॥ **29.7** ॥

योषावपुर्दनुजमोहनमाहितं ते
श्रुत्वा विलोकनकुतूहलवान् महेशः।
भूतैस्समं गिरिजया च गतः पदं ते
स्तुत्वाऽब्रवीदभिमतं त्वमथो तिरोधाः ॥ **29.8** ॥

आरामसीमनि च कन्दुकघातलीला -
लोलायमाननयनां कमनीं मनोज्ञाम्।
त्वामेष वीक्ष्य विगलद्वसनां मनोभू -
वेगादनङ्गरिपुरङ्ग समालिलिङ्ग ॥ **29.9** ॥

भूयोऽपि विद्रुतवतीमुपधाव्य देवो
वीर्यप्रमोक्षविकसत्परमार्थबोधः।
त्वन्मानितस्तव महत्त्वमुवाच देव्यै
तत्तादृशस्त्वमव वातनिकेतनाथ ॥ **29.10** ॥

॥ इति श्रीमन्नारायणीये एकोनत्रिंशं दशकं समाप्तम् ॥